इयम् आकाशवाणी

सम्प्रति वार्ताः श्रूयन्ताम्

प्रवाचिका – निधिः तिवारी

**अथ वार्ताः**

**वर्णोत्सवः होल्युत्सवः**

वर्णोत्सवः होलिकोत्सवः अद्य सम्पूर्णे देशे सोत्साहम् आमान्यते। अयम् उत्सवः शुभस्य दुष्टतायाः उपरि विजयस्य सूचकत्वेन आमन्यते, वसन्तर्तोः आगमनस्य च परिचायकः अयम् उत्सवः। अस्मिन् दिने जनाः परस्परं वर्णं प्रयोजयन्ति, अभिवादनस्य आदानं प्रदानं च कुर्वन्ति। राष्ट्रपतिः द्रौपदीमुर्मु: उपराष्ट्रपतिः जगदीपधनखड़: च होलिकोत्सवे देशवासिनाम् अभिवादनं कृतवन्तौ। राष्ट्रपतिपदासीना द्रौपदीमुर्मु: होलिकोत्सवं अभिलक्ष्य सर्वेभ्य: नागरिकेभ्य: शुभकामना: प्रदत्तवती। स्वसन्देशेराष्ट्रपति प्रावोचत् यत् अयमुत्सव: हर्षम् उत्साहं च आनयति। अत्रावधौ उपराष्ट्रपति: जगदीप-धनखड़: देशवासिभ्य: शुभकामना: दत्वा उक्तवान् यत् होलिकोत्सव: वसन्तर्तो: आगमनस्य प्रतीको वर्तते यो हि नवीनस्य शुभारम्भस्य दृक्पातस्य च प्रतीको वर्तते। प्रधानमन्त्री नरेन्द्रमोदी अपि देशवासिभ्य: स्वशुभवचांसि समर्पितवान्। प्रत्यपादयत् च यत् अयमुत्सव: समेषां जीवने नवीनम् उत्साहम् अद्य च देशवासिषु ऐक्यभावस्य वर्णं प्रबलं करिष्यति।

**रेलप्रचालनम्**

उत्तररेलविभाग: होलीपर्व समाश्रित्य यात्रिणां सुगमयात्रायै चतुश्शताधिकानि रेलयानानि प्रचालयति। उत्तर रेल-मार्गस्य मुख्यजनसम्पर्काधिकारी हिमान्शु-शेखर-उपाध्याय: सूचितवान् यत् यात्रिणां सौकर्यार्थं विस्तृता व्यवस्था सम्पादिता। असौ प्रत्यपादयत् यत् राष्ट्रीयराजधान्यां नवदिल्ली-आनन्दविहार-हजरतनिजामुद्दीनरेलवे स्थानकेषु यात्रिणां कृते सुरक्षाव्यवस्था नियन्त्रणकक्षा: प्रतीक्षालाया: च निर्मिता: सन्ति।

**केन्द्रीय-विधि-न्याय-मन्त्री**

केन्द्रीय-विधि-न्याय-मन्त्री अर्जुनराम-मेघवालः पुनः उक्तवान् यत्, राष्ट्रिय-शिक्षा-नीतौ (एन्.ई.पी.) राज्यानां मातृभाषानां, संविधानस्य अष्टम्याम् अनुसूच्यां मान्यता-प्राप्तानां भाषाणां च प्रचारस्य उपबन्धाः सन्ति इति। गतरात्रौ पुदुचेरी-नगरे पद्मश्रीपुरस्कारविजेता तथा ताविल्-वादकस्य दचनमूर्ति-वर्यस्य सम्मान-कार्यक्रमे सम्बोधयन्, मन्त्रिणा अवधानं दत्तं यत् अष्टम-अनुसूच्यां सूचीबद्धायाः शास्त्रीयभाषायाः रूपेण तमिळ्-भाषां एन. ई. पी. इत्यस्य अन्तर्गतं प्रोत्साहितं, समुचितं प्रामुख्यं च दीयते इति।

**वेव्ससम्मेलनम्**

विश्व-श्रव्य-दृश्य-मनोरञ्जन-शिखर-सम्मेलनात् पञ्चविंशत्यधिक-द्विसहस्र-तमवर्षात् भारतप्रशासनं ह्य: नवदिल्ल्या: सुषमास्वराज-भवने एकेन वैश्विकसमुदायेन सह सहभागं कृतवत्। सूचनाप्रसारणमन्त्रालयेन आयोजिते एतस्मिन् कार्यक्रमे विविधप्रशासनानां प्रतिनिधित्वं सम्पादयता वैश्विक-सञ्चार-संवादेन सहभागिता निर्व्यूढा। कार्यक्रमे सम्भाषमाण: सूचनाप्रसारणमन्त्री अश्विनीवैष्णव: अकथयत् यत् वेव्सइति मञ्च: जीवनस्य समग्रक्षेत्राणां नवयुगस्य निमतृभ्य: उच्चमूल्ययुतां सामग्रीं निर्मातुं परिकल्पितो विद्यते इति।

**परीक्षा-स्थगिता**

केन्द्रीयमाध्यमिक-शिक्षा-मण्डलेन विज्ञापितं यत् द्वादश्या: कक्षाया: या परीक्षा श्व: निर्धारितासीत् सैव देशस्य विविधभागेषु होलिकोत्सवस्य विस्तारो भवति चेदपि ख्यापितयोजनानुसारमेव आयोजयिष्यते। मण्डलेन ख्यापितं यत् हिन्दीविषयस्य ऐच्छिक-हिन्दी-विषयस्य च परीक्षा निर्धारिततिथौ आयोज्यते इति।

## क्रिकेट्

वीमेन्स-प्रीमीयर-लीग-इत्येस्यां क्रिकेट-मालिकायां ह्य: रात्रौ मुम्बईनगर्या: ब्रॉबोर्न-क्रीडाङ्गणे मुम्बई-इण्डियन्सदलेन सप्तचत्वारिंशत्-धावनाङ्कै: गुजरात-जायन्ट्स-दलं पराजित्य निर्णायकचक्रके द्वन्द्वे प्रविष्टम्। अनेन विजयेन सहैव श्व: मुम्बईइण्डियन्सदलं उपाधिम् अधिगन्तुं डेल्ही-कैपिटल्स-दलेन सह क्रीडिष्यति।

## बैडमिण्टन्

बैडमिण्टन-क्रीडायाम्, भारतस्य ट्रीसाजॉली-गायत्री-गोपीचन्द्र इत्येते इंग्लैण्डनगरे बर्मिंघमस्थले ऑल-इंग्लैण्ड-ओपन-चैम्पियनशिप-इत्येतस्या: प्रतिस्पर्धाया: महिलायुगलस्य प्रागुपान्त्यचक्रे प्रविष्टवत्यौ।

।। इति वार्ता:।।